# paramArthacharchA

# परमार्थचर्चा

## Document Information

Text title : Paramarthacharcha by Abhinavagupta

File name : paramArthacharchA.itx

Category : major_works, abhinavagupta, aShTaka, , kAshmIrashaivadarshanam

Location : doc_z_misc_major_works

Author : Abhinavagupta

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description-comments : from Abhinavastotravali

Latest update : December 18, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# परमार्थचर्चा

अर्केन्दुदीपाद्यवभासभिन्नं नाभात्यतिव्याप्ततया ततश्च ।
प्रकाशरूपं तदियत् प्रकाश्यप्रकाशताख्या व्यवहार एव ॥ १॥

ज्ञानाद्विभिन्नो न हि कश्चिदर्थः तत्तत्कृतः संविदि नास्ति भेदः ।
स्वयंप्रकाशाच्छतमैकधाम्नि प्रातिस्विकी नापि विभेदिता स्यात् ॥ २॥

इत्थं स्वसंविद्घन एक एव शिवः स विश्वस्य परः प्रकाशः।
तत्रापि भात्येव विचित्रशक्तौ ग्राह्यगृहीतृप्रविभागभेदः ॥ ३॥

भेदः स चायं न ततो विभिन्नः स्वच्छन्दसुस्वच्छतमैकधाम्नः।
प्रासादहस्त्यश्वपयोदसिन्धुगिर्यादि यद्वन्मणिदर्पणादेः ॥ ४॥

आदर्शकुक्षौ प्रतिबिम्बकारि सबिम्बकं स्याद्यदि मानसिद्धम् ।
स्वच्छन्दसंविन्मुकुरान्तराले भावेषु हेत्वन्तरमस्ति नान्यत् ॥ ५॥

संविद्घनस्तेन परस्त्वमेव त्वय्येव विश्वानि चकासति द्राक् ।
स्फुरन्ति च त्वन्महसः प्रभावात् त्वमेव चैषां परमेशकर्ता ॥ ६॥

इत्थं स्वसंवेदनमादिसिद्धमसाध्यमात्मानमनीशमीशम् ।
स्वशक्तिसम्पूर्णवदेशकालं नित्यं विभुं भैरवनाथमीडे ॥ ७॥

सद्वृत्तसप्तकमिदं गलितान्यचिन्ताः
  सम्यक् स्मरन्ति हृदये परमार्थकामाः ।
ते भैरवीयपरधाम मुहुर्विशन्ति
  जानन्ति च त्रिजगतीपरमार्थचर्चाम् ॥ ८॥

॥ इति श्रीमदभिनवगुप्तविरचिता परमार्थचर्चा समाप्ता ॥

Encoded and proofread by Ruma Dewan

*paramArthacharchA*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*